भूतरूपतोपदेशः। "अध्यारोपापवादाभ्यां वस्तुतत्त्वविनिश्चय, इति वेदा०प्र०। भावे घञ्। विश्वासे, प्रणये च। करणे घञ्। बाधनसाधने वस्तुमात्रे। कर्म्मणि घञ्। कुत्सितवाद्ये "मधुकरैरपवादकरैरिव" माघः "अपवादः मृगवञ्चनाय घण्टादि कुत्सितवाद्यमिति" मल्लि०। भावे घञ्। आदेशे "ततोऽपवादेन पताकिनीपतेरिति" किरा०। "अपवादेन आदेशेनेति" मल्लि०। निरासने च।

**अपवादक** त्रि० अपसार्य्य स्वविषयात्, वदति शास्त्रान्तरम् व्यवस्थापयति वद–ण्वुल्। स्वविषयं परिहृत्य सामान्यशास्त्रस्येतरत्र व्यवस्थापके विशेषशास्त्रे। अप+वद–ण्वुल्। अकीर्त्तिकरे" निन्दके निरासके च त्रि०। [ङीप्।

**अपवादिन्** त्रि० अप+वद–णिनि। अपवादकर्त्तरि स्त्रियां

**अपवारण** त्रि० अपवारयति आच्छादयति अप+वृ–णिच् नन्द्या० ल्यु। व्यवधायके। भावे ल्युट्। व्यवधाने न०। आधारे ल्युट्। अन्तर्द्धौ सति तु व्यवधाने अन्तर्धानं भवत्येवेति तस्य तथात्वम्।

**अपवारित** त्रि० अप+वृ–णिच्–कर्म्मणि क्त। आच्छादिते व्यवधापिते च। भावे क्त। अपवारणे, अप्रकाशे न०। "तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्त्य प्रकाश्यते" इति सा०द०। उक्ते परावृत्त्यान्यस्य रहस्यकथने न०। परावृत्त्यान्यस्य रहस्यकथनमपवारितमिति तदर्थः।

**अपवारितक** न० अपवारितं अपवारणम् अप्रकाशमेव स्वार्थे कन्। अप्रकाशे "अपवारितकेन प्राहिणोतीति" नाटकम्। अप्रकाश्याच्छादयतीत्यर्थः।

**अपवारुक** पु० अप+वृ–ब०। उकञ्। प्रस्तरे।

**अपवार्य्य** अव्य० अप+वृ–णिच्–ल्यप्। आच्छाद्येत्यर्थे "त्रिपताककरेणान्यमपवार्य्यान्तरा कथेति" सा०द०।

**अपवास** पु० अपसृत्य वासः स्थितिः। अपसरणे "अपवासे नक्षत्राणामपवास उपसामुत" अथ० ३,७,७।

**अपवाह** पु० अपसार्य्य वाहः स्थानान्तरनयनम्। इतरस्थानादपसार्य्य स्थानान्तरप्रापणे। "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति" कौटिल्यः "सोनाः बट् गिति नवरससरयतियुतमपवाहाख्यमिति" वृ०र०उक्ते वस्य वृत्तभेदे।

**अपवाहन** न० अप+वह–णिच्–ल्युट्। परदेशस्थजनानां स्वदेशप्रापणे "स्वराष्ट्रं वर्द्धयेद्राजा परदेशापवाहनादिति" हितो०। [वह–णिच्–ल्यप्। अपसार्य्येत्यर्थे अव्य०।

**अपवाह्य** त्रि० अप+वह–कर्म्मणि ण्यत्। दूरीकार्य्ये। अप+

**अपविघ्न** त्रि० अपगतो विघ्नो यस्मात्। विघ्नशून्ये "शतं क्रतूनामपविघ्नमाप सः" इति रघुः।

**अपवित्र** पु० न पवित्रः कृतशौचादिः। अकृतशौचादौ, "अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरे शुचिरिति" स्मृतिः।

**अपविद्ध** त्रि० अप+व्यध–क्त। त्यक्ते "अपविद्धगदोबाहुर्भग्नशाख इव द्रुम" इति कु०। "सोऽपविद्धस्तया रहस्यनिर्भेदभयादिति" दश०कु०। प्रत्याख्याते, निरस्ते च "रक्षोविप्रकृतावास्तामपविद्धशुचाविव" रघुः "मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते" इति मनूक्ते द्वादशपुत्रान्तर्गते पुत्रभेदे पु०।

**अपविद्या** स्त्री अप विरोधे प्रा०त०। विद्याविरोधिन्यां वेदान्तादिप्रसिद्धायामविद्यायाम् "तत्त्वस्य संविसृतिरिवापविद्यामिति" किरा०। अपकृष्टा विद्या। बौद्धाद्यागमविद्यायाम्। [राज०नि०। अपगतविषमात्रे त्रि०।

**अपविषा** स्त्री अपगतं विषं यस्याः। निर्विषतृणभेदे

**अपवृत्त** त्रि० अपवर्त्तते अप+वृत–कर्त्तरि क्त। समाप्ते, "अपवृत्ते कर्मणि वामदेव्यगानं शान्त्यर्थमिति" गोभिलः। "अपवृत्ते समाप्ते" संस्कारतत्त्वे रघुनन्दनः।

**अपवेध** पु० अपकृष्टः अस्थानकृतत्वात् वेधः प्रा०त०। मणीनामस्थानकृते वेधने "मणीनामपवेधे च दण्ड उत्तमसाहसम् इति" मनुः।

**अपव्यय** पु० अपकृष्टः शास्त्रादिमर्य्यादामुल्लङ्घ्यास्थाने कृतत्वात् व्ययः प्रा०त०। द्यूतवेश्यादावस्थाने कृते व्यये। अपगतः व्ययः क्षयोऽस्य। अविनश्वरे त्रि०।

**अपव्ययमान** त्रि० अप+वि+अय–शानच्। अपलाप कर्त्तरि। "अर्थेऽपव्ययमानन्तु कारणेन विभावितम्। दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तित इति" मनुः। अपव्ययमानमपलपन्तमिति दि०त०रघु०। अपव्ययकर्त्तरि त्रि०।

**अपव्रत** त्रि० अपगतं व्रतं श्रौतादि कर्म्म यस्य। अपगत विहितकर्म्मणि "अनुव्रताय रन्धयन्नपव्रतानिति" ऋ०१,५१,८, अपव्रतान् "अपगतकर्म्मण" इति भा०। "गूढं सूर्य्यं तमसाऽपव्रतेन" ऋ०५,०,४,६,१, अपगतव्रतमस्य। नष्टव्रते गृहीतव्रतत्यागिनि त्रि०। प्रा०त०। अपकृष्टे व्रते न०।

**अपशङ्क** त्रि० अपगता शङ्कास्य प्रा०ब०। निःशङ्के शङ्कारहिते।

**अपशद** त्रि० अप+शद–कर्त्तरि अच्। नीचे इति केचित्। तच्च सदधातुघटिततया दन्त्यमध्यमिति बहवः।

**अपशब्द** पु० अप वैपरीत्ये प्रा०त०। शक्तिवैकल्यप्रमा-